अत्याशु सिकताशर्करान्विताम्” सुश्रु०। अयञ्च महापापजत्वान्महारोगः। “उन्मादस्त्वग्दोषो राजयक्ष्मा श्वासोमधुमेहो भगन्दरः। उदरोऽश्मरीत्यष्टौ महारोगाः” शु०त० नार०।

**अश्मरीघ्न** पु० अश्मरीं मूत्रकृच्छ्रं हन्ति हन–ट। वरुणवृक्षे

**अश्मरीहर** पु० अश्मरीं हरति हृ–ट। (देधान) देवधान्ये।

**अश्मवत्** त्रि० अश्माऽस्त्यत्र मतुप्। पाषाणभूयिष्ठे देशे स्त्रियां ङीप्। तथाविधभूमेर्गुणाश्च। “तत्राश्मवती स्थिरा गुर्व्वी श्यामा कृष्णा वा स्थूलवृक्षशस्यप्राया गुणभूयिष्ठा। स्निग्धा शीतलासन्नोदका स्निग्धशस्यतृणकोमलवृक्षप्राया शुक्लाम्बुगुणभूयिष्ठा नानावर्णा लघ्वश्मवती प्रविरलाल्प पाण्डुवृक्षप्ररोहाऽग्निगुणभूयिष्ठा इति” सुश्रुतः।

**अश्मसार** पु०न० अश्मनः सार इव। लौहे। “फलाद्र्ष्टिक दर्भाश्मसारचूर्णकवारिणा” सुश्रु०। “प्राणाः स त्वरमश्मसारकठिना गच्छन्ति गच्छन्त्वमी” सा०द०। ६ब०। तत्तुल्यकठिने त्रि०।

**अश्महन्मन्** न० हन्यतेऽनेन हन–मनिन् हन्म आयुधम् अश्मनिर्म्मितं हन्म। लौहनिर्मिते आयुधे “अग्नितप्तेभिर्युवमश्महन्मभिः” ऋ० ७,१०४,५।

**अश्मादि** पु० ६त०। चतुरर्थ्यां पाणिन्युक्तरप्रत्ययनिमित्ते शब्दगणे स च गणः अश्मन्, यूथ, ऊष, मीन, नद, दर्भ, वृन्द, गुद, खण्ड, नग, शिखा, कोट, पाम, कन्द, कान्द, कुल, गह्व, गुड़, कुण्डल, पीन, गुह।

**अश्मार्म** न० अश्मकारकमर्म्म। (पाथुरे) अश्मरीरोगे।

**अश्मीर** पु०न० अश्मास्त्यस्य ईरन्। (पाथुरे) अश्मरीरोगे।

**अश्मोत्थ** न० अश्मनः उत्तिष्ठति उद्+स्था–क ५त०। शिलाजतुनि राजनि०।

**अश्र** न०अश्नुते नेत्रम् अश–रक्। नेत्रजले “सखीभिरस्रोत्तरमीक्षितामिमाम्” कुमा० “नेत्राभ्यामश्रुतुत्सृजन्” रामा०। सुखा० अस्त्यर्थे इनि न मतुप्। अस्री अस्रयुक्ते त्रि० स्त्रियां ङीप्।

**अश्रद्धा** स्त्री अभावे न०त०। १श्रद्धाभावे विरोधे न०त०। श्रद्धाविरोधिनि २चित्तवृत्तिभेदे। “कामः संकल्पोविचिकित्सा श्रद्धाऽश्रद्धा धृतिर्धृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव” श्रुतिः “अश्रद्धया च यद्दत्तं तत्तामससुदाहृतम्” गीता। न०ब०। ३श्रद्धाशून्ये त्रि०। [शून्ये त्रि०।

**अश्रद्धेय** त्रि० न०त०। श्रद्धानर्हे अविश्वसनीये। १श्रम-

**अश्रम** पु० अभावे न०त०। १श्रमाभावे अनायासे न०ब०।

**अश्रवण** न० अभावे न०त०। १श्रवणाभावे न०ब०। २श्रवणशून्ये त्रि० ३श्रोत्रेन्द्रियशून्ये बधिरे त्रि० ४सर्पे पु०।

**अश्राद्धभोजिन्** त्रि० श्राद्धं न भुङ्क्ते भुज–णिनि असमर्थ स०। सति भोजने श्राद्धमेव योभुङ्क्ते तस्मिन्। “अश्राद्धभोजीत्यत्र सति भोजनेऽश्राद्धमेव भुङ्क्ते न श्राद्धमिति न नियमः तथात्वे व्रतलोपः स्यात्” दुर्गसिंहः प्रा०त०।

**अश्रान्त** त्रि० श्रम–कर्त्तरि न०त०। श्रान्तभिन्ने १श्रमशून्ये २अविरते ३क्रियाविशेषणत्वे न०। “अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवेति नैष०। भावे क्त न०त०। ४अविश्रामे न०।

**अश्रि(श्री)** स्त्री अश्यते संहन्यतेऽनया अश–वङ्क्र्या० क्रि। १गृहादेः कोणे। आश्रीयते संघातार्थम् आ+श्री-“आङि श्रीहनिभ्यां ह्रस्वश्च”उणा०इन् स च डित्।२खड्गादेरग्रभागे उभयत्र वा ङीप्। “वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते” कुमा० वाजपेययूपं प्रकृत्य। “स वा अष्टाश्रिर्भवति तस्मादष्टाश्रिर्भवति” शत०ब्रा०। चतुःपूर्व्वादस्मात् अच् समा० चतुरस्रः। “क्लृप्तोपचारां चतुरस्रवेदीम्” कुमा० योगविभागात् अन्यस्मादप्यच्। तेन त्र्यस्रं षडस्रमित्यादि “आयताश्चतुरस्राश्च त्र्यस्रा मण्डलिनस्तथा” शस्त्रलक्षणे सुश्रुतः “वृत्तान्तस्त्र्यस्रपूर्व्वाणां नावास्राणां पृथक् पृथक्” लीला०। समासान्तविधेरनित्यत्वात् क्वचिन्नाच्। “त्रिरश्रिं हन्ति चतुरश्रिरुग्रः ऋ०१,१५२,२। [कप्। शोभाशून्ये।

**अश्री(क)** नास्ति श्रीर्यस्य नदीत्वाभावात् न ह्रस्वः तेन वा

**अश्रीर** त्रि० न श्रीः अश्रीः अस्त्यर्थे०र। १कुत्सितश्रीके “अश्रीर इव जामाता” ऋ० ८,२,२०। “अश्रीरः गुणैर्हीनः कुत्सितः” भा०। २अमङ्गले च। “कशं चिदश्रीरम्” ऋ० ६,२८,६। “अश्रीरममङ्गलम्” भा०।

**अश्रु** न० अश्नुते व्याप्नोति नेत्रमदर्शनाय अश–क्रुन्। नेत्रजले “पपात भूमौ सह सैनिकाश्रुभिः” दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः” “तमश्रु नेत्रावरणं प्रमृज्य” इति च रघुः। “श्लेष्माश्रु दूषिका स्वेदः” मनुः।

**अश्रुत** त्रि० न०त०। १श्रुतभिन्ने श्रवणाविषयीभूते “येनाश्रुतं श्रुतं भवति येनामतं मतं भवति”छा०उ० श्रूयते श्रुतं शास्त्रं तज्ज्ञानं न०ब०। २शास्त्रज्ञानशून्ये मूर्खे “भागं विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन्” दा०भा० स्मृतिः।

**अश्रुति** स्त्री अभावे न०त०। १श्रवणाभावे न०ब०। २श्रवणशून्ये त्रि० “अश्रुतिमेव तदघं गमयति” शत०ब्रा०।

**अश्रुपात** पु० ६त०। नेत्रजलपाते क्रन्दने। “न चाश्रुपातः